# .. premAmRitarasAyanAkhyA kRiShNAShTottarashatanAmAvaliH ..

## ॥ प्रेमाम्रितरसायनाख्या क्रिष्णाष्टोत्तरशतनामावलिः ॥

॥ श्रीः ॥

ॐ श्री कृष्णाय नमः ।
ॐ कृष्णेन्दिरानन्दाय नमः ।
ॐ गोविन्दाय नमः ।
ॐ गोकुलोत्सवाय नमः ।
ॐ गोपालाय नमः ।५
ॐ गोपगोपीशाय नमः ।
ॐ वल्लभेन्द्राय नमः ।
ॐ व्रजेश्वराय नमः ।
ॐ प्रत्यहन्नूतनाय नमः ।
ॐ तरुणानन्दविग्रहाय नमः ।१०
ॐ आनन्दैकरसास्वादिने नमः ।
ॐ सन्तोषाक्षयकोशभुवे नमः ।
ॐ आभीरिका नवानङ्गाय नमः ।
ॐ परमानन्दकन्दलाय नमः ।
ॐ वृन्दावनकलानाथाय नमः ।१५
ॐ व्रजानन्दनवांकुराय नमः ।
ॐ नयनानन्दकुसुमाय नमः ।
ॐ व्रजभाग्यफलोदयाय नमः ।
ॐ प्रतिक्षणातिसुन्दराय नमः ।
ॐ मोहनाय नमः ।२०
ॐ मधुराकृतये नमः ।
ॐ सुधानिर्यासनिचयसुन्दराय नमः ।
ॐ श्यामलाकृतये नमः ।
ॐ नवयौवनसंभिन्नप्रेमामृतरसार्णवाय नमः ।
ॐ इन्द्रनीलमणिस्वच्छाय नमः ।२५
ॐ दलितांजनचिक्कणाय नमः ।
ॐ इन्दीवरसुखस्पर्शाय नमः ।
ॐ नीरदस्निग्धसुन्दराय नमः ।
ॐ कर्पूरागरुकस्तूरीकुंकुमार्द्रांगधूसराय नमः ।
ॐ सुकुंचितकचन्यस्तलसच्छारुशिखण्डकाय नमः ।३०
ॐ मत्तालिविभ्रमत्पारिजातपुष्पावतंसकाय नमः ।

ॐ आनन्देन्दुजितानन्दपूर्णशारदचन्द्रमसे नमः ।
ॐ श्रीमल्ललाटपाटीरतिलकालकरंजिताय नमः ।
ॐ नीलोन्नतभ्रूविलासमदालसविलोचनाय नमः ।
ॐ आकर्णरक्तसौन्दर्यलहरीदृष्टिमन्थराय नमः ।३५
ॐ घूर्णायमाननयन साचीक्षणविचक्षणाय नमः ।
ॐ अपांगेङ्गितसौभाग्यतरलीकृतलोचनाय नमः ।
ॐ ईषन्मीलितलोलाक्षाय नमः ।
ॐ सुनासापुटसुन्दराय नमः ।
ॐ गंडप्रान्तोल्लसत्स्वर्णमकराकृतिकुण्डलाय नमः ।४०
ॐ प्रसन्नानन्द वदनाय नमः ।
ॐ जगदाह्लादकारकाय नमः ।
ॐ सुस्मितामृतलावण्य प्रकाशीकृतदिङ्मुखाय नमः ।
ॐ सिन्दूरारुणसुस्निग्धमाणिक्यदशनच्छदाय नमः ।
ॐ पीयूषाधिकमाधुर्यसूक्तिश्रुतिरसायनाय नमः ।४५
ॐ त्रिभंगिललिताय नमः ।
ॐ तिर्यक्ग्रीवाय नमः ।
ॐ त्रैलोक्यमोहनाय नमः ।
ॐ कुंचिताधरसंसक्तकूजत्वेणुविशारदाय नमः ।
ॐ कंकणाङ्गदकेयूरमुद्रिकादिलसत्कराय नमः ।५०
ॐ स्वर्णसूत्रपुटन्यस्तकौस्तुभामुक्तकंधराय नमः ।
ॐ मुक्ताहारोल्लसद्वक्षस्पुरच्छ्रीवक्षलंछनाय नमः ।
ॐ आपीनहृदयाय नमः ।
ॐ नीपमालावते नमः ।
ॐ बन्धुरोदराय नमः ।५५
ॐ संवीतपीतवसनाय नमः ।
ॐ रशनाविलसत्कटये नमः ।
ॐ अन्तरीणकटीबद्धप्रपदान्दोलितांचलाय नमः ।
ॐ अरविन्दपदद्वन्द्व कलक्वणितनूपुराय नमः ।
ॐ बन्धूकारुणमाधुर्य-सुकुमारपदांबुजाय नमः ।६०
ॐ नखचन्द्रजिताशेपूर्णशारदचन्द्रमसे नमः ।
ॐ ध्वजवज्रांकुशांभोजराजच्चरणपल्लवाय नमः ।
ॐ त्रैलोक्याद्भुतसौन्दर्यपरीपाकमनोहराय नमः ।
ॐ साक्षात्केलिकलामूर्तये नमः ।
ॐ परिहासरसार्णवाय नमः ।६५
ॐ यमुनोपवनश्रेणीविलासिने नमः ।
ॐ व्रजनायकाय नमः ।

ॐ गोपाङ्गनाजनासक्ताय नमः ।
ॐ वृन्दावनपुरन्दराय नमः ।
ॐ आभीरनगरीप्राणनायकाय नमः ।७०
ॐ कामशेखराय नमः ।
ॐ यमुनानाविकाय नमः ।
ॐ गोपीपारावारकृतोद्यमाय नमः ।
ॐ राधावरोधनिरताय नमः ।
ॐ कदंबवनमन्दिराय नमः ।७५
ॐ व्रजयोषित्सदाहृद्याय नमः ।
ॐ गोपीलोचनतारकाय नमः ।
ॐ यमुनानन्दरसिकाय नमः ।
ॐ पूर्णानन्दकुतूहलिने नमः ।
ॐ गोपिकाकुचकस्तूरीपङ्किलाय नमः ।८०
ॐ केलिलालसाय नमः ।
ॐ अलक्षितकुटीरस्थाय नमः ।
ॐ राधासर्वस्वसंपुटाय नमः ।
ॐ वल्लवीवदनांभोजमधुमत्तमधुव्रताय नमः ।
ॐ निगूढरसविदे नमः ।८५
ॐ गोपीचित्ताह्लादकलानिधये नमः ।
ॐ कालिन्दीपुलिनानन्दिने नमः ।
ॐ क्रीडाताण्डवपण्डिताय नमः ।
ॐ आभीरिकानवानंगरंगसिन्धुसुधाकराय नमः ।
ॐ विदग्धगोपवनिताचित्ताकूतविनोदकाय नमः ।९०
ॐ नानोपायनपाणिस्थगोपनारीगणावृताय नमः ।
ॐ वांछाकल्पतरवे नमः ।
ॐ कोटिकन्दर्पलावण्याय नमः ।
ॐ कोटीन्दुतुलितद्युतये नमः ।
ॐ जगत्रयमनोमोहकराय नमः ।९५
ॐ मन्मथमन्मथाय नमः ।
ॐ गोपीसीमन्तिनीशश्वद्भावापेक्षपरायणाय नमः ।
ॐ नवीनमधुरस्नेहप्रेयसीप्रेमसंचयाय नमः ।
ॐ गोपीमनोरथाक्रान्ताय नमः ।
ॐ नाट्यलीलाविशारदाय नमः ।१००
ॐ प्रत्यंगरभसावेशप्रमदाप्राणवल्लभाय नमः ।
ॐ रासोल्लासमदोन्मत्ताय नमः ।
ॐ राधिकारतिलंपटाय नमः ।

ॐ खेलालीलापरिश्रान्तस्वेदांकुरचिताय नमः ।
ॐ गोपिका कामुकाय नमः ।१०५
ॐ श्रीमते नमः ।
ॐ मलयानिलसेविताय नमः ।
ॐ सकृत्प्रपन्नजनतासंरक्षण्धुरन्धराय नमः ।
ॐ सुप्रसन्नाय नमः ।
ॐ गोपीजनवल्लभाय नमः ।
॥ इति श्री प्रेमामृतरसायनाख्याष्टोत्तरशत नामावलिः ॥

Endoded by N. Balasubramanian bbalu@satyam.net.in

---

Please send corrections to sanskrit@cheerful.com
Last updated June 2, 2007